दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदकृष्णचतुर्दशी
भाद्रपद 25 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-9 ■ वर्ष-5 ■ अङ्क-321 | 1 | सितम्बर 10, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 'विश्व-कौशल-स्पर्धायाम्' भारतं प्रथमवारं एकादशसु नवीनासु कौशल-श्रेणीषु भागं ग्रहीष्यति

4 अधुना हिमाचले मादकतारहिता, वृत्ति- प्रदायिनी भविष्यति विजयायाः कृषिः, एक- बीघा- परिमितायै भूमये आवेदनानि आरब्धानि

9 विनोबा- भावे- विश्वविद्यालयस्य संस्कृतविभागस्य पञ्चदिवसीयव्याख्यानमालाया द्वितीयदिनं सम्पन्नम्

## केन्द्रीय-मन्त्रिमण्डलेन अष्ट-रेल-बहुपथ-प्रकल्पाः अनुमोदिताः; 'स्वर्णिम-चतुर्भुज-मार्गस्य' चतुष्पथीकरणाय च स्वीकृतिः प्रदत्ता



केन्द्रीय-मन्त्रिमण्डलं रेल-सञ्चालस्य अभूतपूर्व-विस्ताराय क्षमता-संवर्धनाय च विंशति-सहस्र-कोट्यधिक रूप्यकाणां व्ययेन निर्मीयमानेभ्यः अष्ट-बहुपथ-रेल-प्रकल्पेभ्यः स्वीकृतिं प्रादात्। नवदेहल्यां संवाददातॄन् सम्बोधयन् सूचना-प्रसारण-रेल-मन्त्री अश्विनी-वैष्णवः प्रावोचत् यत् एतेषु प्रथम-चरणे पश्चिम बङ्गाल-झारखण्ड-ओडिशा-मध्यप्रदेश-छत्तीसगढ़-राज्येषु व्याप्त-चतुर्दश-मण्डलेषु नूतन मार्गस्य निर्माणं विधास्यते। अस्मिन् 'खड़कपुर-झारसुगुडा' चतुर्थ-पथः, 'कटनी-पेण्ड्रा-रोड' चतुर्थ-पथः, तथा 'बिलासपुर-पेण्ड्रा रोड' तृतीय-पथः समाविष्टाः सन्ति। अनेन सहैव मन्त्रिमण्डलेन तमिलनाडु-आन्ध्रप्रदेश-कर्नाटक-तेलङ्गाना-राज्येषु चत्वारिंशदुत्तरपंचशत किलोमीटर-परिमित-विस्ताराय एक-विंशत्युत्तर दश-सहस्र-कोटि रूप्यकाणां अन्य-पञ्च-परियोजनाः अपि अनुमोदिताः। मन्त्रिणा सविशेषं प्रख्यापितं यत् सर्वकारेण देशस्य सप्त-उच्च-सान्द्रता-रेल-वीथिनां चतुष्पथीकरणम् विधातुं निर्णयः गृहीतः। एतेषु देहली-हावड़ा, मुम्बयी-हावड़ा, देहली-मुम्बयी, देहली-गुवाहाटी, देहली-चेन्नई, हावड़ा-चेन्नई तथा मुम्बयी-चेन्नई इति सप्त-प्रमुखाः मार्गाः सन्ति, येन रेलयान-विलम्बस्य समस्या मूलतः विनश्यति ।

## अद्यतनीयं सुभाषितम्

**पितृपैतामहं राज्यं प्राप्तवान् स्वेन कर्मणा।**
**वायुरभ्रमिवासाद्य भ्रंशयत्यनये स्थितः॥**

अर्थात्- अन्याय के मार्ग पर चलने वाला राजा अपने पिता- पितामहादि से विरासत में मिले राज्य को उसी प्रकार से नष्ट कर देता है जैसे तेज हवा बादलों को छिन्न- भिन्न कर देती है। अतः अन्याय मार्ग का अनुसरण कदापि न करें।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## श्रीलङ्का-वायुसेनायाः 'एल-70' प्रक्षेपकाणाम् आधुनिकीकरणाय भारत-श्रीलङ्का-सैन्य-संधिः हस्ताक्षरितम्




भारतस्य रक्षामन्त्री राजनाथसिंहः कोलम्बो नगरे श्रीलङ्कायाः राष्ट्रपतिना अनुरा-कुमार-दिसानायके इत्यमुना सह महत्त्वपूर्णाम् मन्त्रणां व्यदधात् । उपवेशनावधौ उभौ नेतारौ प्रत्यपादयतां यत् उभावपि देशौ निकट-प्रतिवेशिनौ, सामुद्रिक सहयोगिनौ च स्तः इति हेतोः भारतं श्रीलङ्का च उभयोः राष्ट्रयोः समग्र-विकासाय, जन-कल्याणाय च परस्पर-सहयोगं सातत्येन निर्वहिष्यतः। सामाजिक सञ्चार-पटले रक्षामन्त्रिणा न्यरूप्यत यत् अस्मिन् क्षेत्रे सुरक्षायाः, स्थैर्यस्य, शान्तेः, समृद्धेः च संवर्धनाय उभौ देशौ संयुक्ततया कार्यं विधास्यतः। अवधेयं वर्त्तते यत् रक्षामन्त्री त्रिदिवसीय यात्रायाः अङ्गतया कोलम्बो-नगरं सम्प्राप्तवान्, रक्षामन्त्री राजनाथ-सिंहः रक्षा-विदेश-मन्त्रालययोः वरिष्ठाधिकारिभिः समन्वितस्य उच्चस्तरीय प्रतिनिधि-मण्डलस्य नेतृत्वं विधत्ते । रक्षामन्त्रिणः हार्दिकं स्वागतं व्याहरन् श्रीलङ्कायाः राष्ट्रपतिः दिसानायके भारतस्य प्रधानमन्त्रिणा नरेन्द्र मोदिना सह स्वकीयं पूर्वतनं संवादं सस्मार, अथ च दृढतया पुनरुदघोषयत् यत् श्रीलङ्का स्वकीयायाः भूमेः उपयोगं भारतस्य सुरक्षा-हितान् बाधमानानां शत्रुतापूर्ण-गतिविधीनां कृते कदापि न अनुमंस्यते । अवसरेऽस्मिन् उभयतः श्रीलङ्का-वायुसेनायाः कृते L70 प्रक्षेपास्त्राणां उन्नयनाय च द्वयोः देशयोः एन-सी-सी, एन-डी-सी इत्यनयोः च मध्ये सहयोगाय सहमति-पत्राणाम् आदान-प्रदानं व्यधायि। श्रीलङ्का-वायुसेनायाः षण्णां L-70 प्रक्षेपास्त्राणां उन्नयन-प्रकल्पः भारत-सर्वकारस्य अनुदान-साहाय्यान्तर्गतं वर्तते। उभौ नेतारौ भारतीय-सुरक्षा-बलैः विनिर्मितानां त्रयाणां बैली-सेतूनां आभासीय माध्यमेन लोकार्पणम् अकुरुताम्। अनन्तरं प्रवासि-भारतीय-समुदायेन सह संवाद-काले रक्षामन्त्रिणा श्रीलङ्कास्थः भारतीय समुदायः उभयोः देशयोः मध्ये सम्पर्क-सेतुः इति अभिहितः । श्रीसिंहेन उद्घोषितं यत् सङ्कट-काले भारतं सर्वदैव श्रीलङ्कादेशेन सह दृढतया स्थास्यति। उभयोः राष्ट्रयोः मध्ये सांस्कृतिक-सभ्यतागत-सम्बन्धाः सन्ति । स्वीये सम्बोधने भारतस्य द्रुतगामि-आर्थिक-परिवर्तनं प्रतिपादयन् रक्षामन्त्री अवोचत् यत् भारतं विश्वस्य तीव्रतम-विकासशील-अर्थव्यवस्थासु अग्रगण्यतां भजते, यच्च वैश्विक-आर्थिक-वृद्धौ षोडश-प्रतिशतादधिकम् योगदानम् आविष्करोति ।

## आगामिनः ब्रिक्स शिखर सम्मेलनस्य पूर्वाङ्ग-रूपेण मुम्बईय्यां ब्रिक्स-वित्त-मन्त्रिणां, केन्द्रीय-बैङ्क-नियामकानां च अन्तिमा महत्त्वपूर्णा -सङ्गोष्ठी सञ्जाता

आगामिनः ब्रिक्स शिखर सम्मेलनस्य पूर्वाङ्ग-रूपेण मुम्बईय्यां ब्रिक्स-वित्त-मन्त्रिणां, केन्द्रीय-बैङ्क-नियामकानां च अन्तिमा महत्त्वपूर्णा उपवेशन-सङ्गोष्ठी सञ्जाता । अस्मिन् वर्षे ब्रिक्स-वित्त-धारायाः मुख्य विषयः दृढतायै, नवीनीकरणाय, सहयोगाय, शाश्वत-विकासाय च निर्माणम्" इति निर्धारितम् अस्ति। अस्याः शृङ्खलायाः पूर्वतनं समुपवेशनं गतमासे जयपुराभिधाने नगरे सञ्जातम् । मुम्बई-नगरे निर्धारित-अन्तिमोपवेशनात् प्राक् केन्द्रीय-वित्तमन्त्रिणा निर्मला सीतारमण इत्यनया ब्रिक्स-वित्त-मार्गस्य प्रमुख-निष्कर्षाणां सविस्तरा समीक्षा कृता।

## विश्व-दिव्याङ्ग-धनुर्क्रीडायाः अन्तिमे दिवसे भारतेन द्वे सुवर्णपदके चत्वारि च कांस्य पदकानि स्वायत्तीकृतानि

अहमदाबादे प्रचलन्त्याः विश्व-दिव्याङ्ग-धनुर्क्रीडायाः अन्तिमे दिवसे भारतेन उत्कृष्ट प्रदर्शनेन द्वे सुवर्णपदके चत्वारि च कांस्य पदकानि स्वायत्तीकृतानि । अत्र वर्तमान-पैरालम्पिक विजेता हरविन्दर-सिंहः, विश्व-प्रथमाङ्किता शीतल-देवी च भारतीय-दलस्य नेतृत्वं व्यधत्ताम्।

# 'विश्व-कौशल-स्पर्धायाम्' भारतं प्रथमवारं एकादशसु नवीनासु कौशल-श्रेणीषु भागं ग्रहीष्यति




चीनदेशस्य शाङ्घाई-नगरे अस्मिन् मासे द्वाविंशतिः दिनाङ्कतः सप्तविंशतिः दिनाङ्क यावत् आयोज्यमानायां अष्टचत्वारिंशत्तमायाम् 'विश्व-कौशल-स्पर्धायाम्' भारतं प्रथमवारं एकादशसु नवीनासु कौशल-श्रेणीषु भागं ग्रहीष्यति। कौशल-विकास-उद्यमिता-मन्त्रालयः प्रत्यपादयत् यत् 'स्किल इण्डिया' दलम् चतुःषष्टि-कौशलेभ्यः त्रिषष्टि-कौशलेषु प्रायः सप्तति-प्रतियोगिनां दलेन सह सहभागितां विधास्यति । मन्त्रालयस्य अनुसारम् एषा अद्यावधि विश्व-कौशल-स्पर्धायां भारतस्य अत्यन्तं विविधतापूर्णयुता सहभागिता अस्ति। एतासु एकादश-नवीन श्रेणीषु 'दन्त-कृत्रिम-अङ्ग-निर्माणम्' 'डिजिटल-इण्टरएक्टिव-मीडिया-डिजाइन' इत्यादयः विषयाः समाविष्टाः सन्ति। भारतस्य सहभागिताविषये वदन्त्या कौशल-विकास-उद्यमिता-मन्त्रालयस्य सचिवया देवश्री-मुखर्जी-वर्यया उक्तं यत्, एतासु नवीनासु श्रेणीषु भारतस्य सहभागिता देशस्य कौशल-पारिस्थितिकी-तन्त्रस्य भविष्योन्मुखताम् वैश्विक प्रासङ्गिकतां च दर्शयति। सा एतदपि उक्तवती यत् दृढ-सहयोगेन सर्वकारः युवानाम् कृते आत्मविश्वासेन वैश्विक प्रतिस्पर्धायाम् अवतीर्य उत्तम-मानकान् प्राप्तुं मार्ग प्रशस्तं करोति ।

## राष्ट्रीय-राजधानी-क्षेत्राय तन्निकटवर्ती-क्षेत्रेभ्यश्च आयोगस्य संवैधानिक-निर्देशानां पालनम् आवश्यकम् - वायु-गुणवत्ता-प्रबन्धन-आयोगः

CAQM

राष्ट्रीय-राजधानी-क्षेत्राय तन्निकटवर्ती-क्षेत्रेभ्यश्च वायु-गुणवत्ता-प्रबन्धन-आयोगेन उद्घोषितं यत् आयोगस्य संवैधानिक-निर्देशानां प्रभावी कार्यान्वयनम् एन.सी.आर.-क्षेत्रे वायु-प्रदूषणस्य निवारणाय शमनाय च अत्यन्तं निर्णायकम् अस्ति। आयोगेन बलेन प्रतिपादितं यत् सम्बद्ध-प्राधिकरणाः आयोगस्य आज्ञानाम् सामयिकं परिपालनं सुनिश्चित्य क्षेत्र-स्तरे प्रभाविकार्यान्वयनाय निरीक्षण-प्रवर्तन-तन्त्रं सुदृढीकुर्युः । आयोगस्य अध्यक्षस्य श्री राजेश-वर्मा-वर्यस्य अध्यक्षतायाम् हरियाणा-राज्य-प्रदूषण-नियन्त्रण-आयोगेन सह आयोगस्य संवैधानिक-निर्देशानाम् अनुपालनम् अधिकृत्य एका समीक्षा-सभा समायोजिता। एतेषु निर्देशेषु पञ्चशत-वर्गमीटर-परिमित-ततोऽधिक-क्षेत्रफल-युक्तानां सर्वेषां निर्माण-विध्वंस-परियोजनानाम् राज्यस्य जाल-पटले पञ्जीकरणं तथा च धूलि नियन्त्रण-उपायानाम् सुदूर-परीक्षणाय क्रियाशील-वीडियो-निरीक्षण-प्रणाल्याः संस्थापनम् अनिवार्य विहितम्। तथापि, आयोगस्य निरीक्षण-अभियानेषु बह्वयः विसङ्गतयः परिदृष्टाः, यासु अपूर्णाः अपर्याप्ताः वा वेब-कैमरा लिङ्क्, अक्रियाशीलाः जाल-सम्पर्काः, तथा सफलाभिलेखनानन्तरमपि चित्रग्राहिणाम् 'ऑफलाइन' स्थितौ अवस्थानं समाविष्टम् अस्ति ।

## नवदेहली: ब्रिक्स डब्ल्यू.बी.ए. महिला-नेतृत्व-विकास-शिखरसम्मेलनस्य आयोजनम्



राजधान्यां नवदेहल्याम् ब्रिक्स डब्ल्यू.बी.ए. (BRICS WBA) महिला-नेतृत्व-विकास-शिखरसम्मेलनम् आयोजितम्। अस्मिन् सम्मेलने मुख्यातिथिरूपेण नवदेहलीतः संसदसदस्या सुश्री बांसुरी स्वराजः समुपस्थिता आसीत्। अस्मिन् सम्मेलने ब्रिक्स-देशानां महिला-वाणिज्य-नेत्र्यः, सर्वकारीयाधिकारिणः, नवान्वेषकाः, उद्यमिन्यश्च एकत्र समागताः। अनेन सह महिलानां नेतृत्वे संजातायाः प्रगतेः उत्सवः आचरितः तथा च देशानां मध्ये परस्परसहयोगस्य भविष्यं रूपयितुं विचारविमर्शः कृतः। अतिरिच्य, सर्वेऽपि प्रतिनिधयः मिलित्वा ब्रिक्स-अर्थव्यवस्थासु महिला-नेतृत्व-विकासस्य, वित्तीय-समावेशनस्य, आर्थिक-सुदृढतायाश्च संवर्धनस्य उपायान् अधिकृत्य विशेषं बलं दत्तवन्तः। पत्रकारैः सह सम्भाषणे सुश्री स्वराजः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः कुशलनेतृत्वे गतेषु द्वादशसु वर्षेषु भारतेन निर्मितायाः नीतिगतसंरचनायाः प्रभावेण, विकासगाथायां अधिकाधिकं महिलाः कथं योजनीयाः इति विषयं प्रति अधुना समग्रं विश्वं जिज्ञासते।

## कर्णाटके प्रवर्तन-निदेशालयेन अष्टादश स्थानेषु अन्वेषणं विहितम्




प्रवर्तन-निदेशालयेन कर्णाटक राज्ये अष्टादश स्थानेषु सघनान्वेषणम् विहितम्। एतेषु राज्यस्य लोकनिर्माण-मन्त्रिणः सतीश-जार्कीहोली-इत्यस्य, तस्य पुत्र्याः सहैव लोकसभा-सांसद्-प्रियङ्का-जार्कीहोली इत्यस्याः आवासः अन्तर्भवति। एतदतिरिच्य, मन्त्रिणः श्यालकस्य वाई-मञ्जुनाथस्य गृहे अपि अन्वेषणं विहितम्। संस्थायाः अनुसारम् एषः विषयः मञ्जुनाथ-वर्यस्य विरुद्धं प्रवृत्तेन भ्रष्टाचार-प्रकरणेन सह सम्बद्धः नास्ति, अपि तु सतीश-जार्कीहोली-वर्यस्य विरुद्धं पृथक्-रूपेण प्रवृत्तेन 'धन-शोधन'-प्रकरणेन सह सम्बद्धः अस्ति।

## राजस्व-गुप्तचर-निदेशालयेन देशव्यापि-अभियानेषु गाञ्जा-चरसादि-मादक-द्रव्याणि गृहीतानि



राजस्व-गुप्तचर-निदेशालयेन विगत-पक्षद्वये देशव्यापि-अभियानेषु प्रायः चत्वारिंशतोत्तर-सप्तशत-किलोग्राम-परिमितं गाञ्जा-चरसादि-मादक-द्रव्यं गृहीतम्। एजेन्सी-संस्थया 'स्वापक-द्रव्य-मनोभावात्मक-पदार्थ-अधिनियमस्य' प्रावधानान्तर्गतम् त्रयोदश जनाः निगृहीताः। एषा अभियान-श्रृङ्खला रेल-वायु-मार्गेभ्यः विशेषतः वाहनानां गुप्त-कोष्ठेभ्यः क्रियमाणं मादक-द्रव्याणां अवैध व्यापारं रोधयितुम् 'डी.आर.आई.'-संस्थायाः निरन्तर प्रयासान् दर्शयति।




## अद्य जवाहर-नवोदय-विद्यालयानां कृते सप्तविंशतितमायाः राष्ट्रिय-युव-संसद्-स्पर्धायाः पुरस्कार-वितरण-समारोहः

जवाहर-नवोदय-विद्यालयानां कृते आयोजितायाः सप्तविंशतितमायाः (२७) राष्ट्रिय-युव-संसद्-स्पर्धायाः (२०२५-२६) पुरस्कार-वितरण-समारोहः अद्य नवदेहल्यां संसद्-भवन-परिसरे आयोजयिष्यते। संसदीय-कार्य-मन्त्री किरेन् रिजिजूः अस्य समारोहस्य अध्यक्षतां विधास्यति तथा च स्पर्धायां प्रशंसनीयं प्रदर्शनं कृतवद्भ्यः छात्रेभ्यः विद्यालयेभ्यश्च पुरस्कारान् प्रदास्यति। संसदीय-कार्य-मन्त्रालयः गतेभ्यः त्रिंशद्भ्यः (३०) वर्षेभ्यः जवाहर-नवोदय-विद्यालयेषु युव-संसद्-स्पर्धानाम् आयोजनं कुर्वन् अस्ति। जवाहर-नवोदय-विद्यालयानां कृते प्रचालितायाः राष्ट्रिय-युव-संसद्-स्पर्धा-योजनायाः अन्तर्गतम् अस्याः शृङ्खलायाः सप्तविंशतितमी स्पर्धा २०२५-२६ वर्षे सम्पूर्णे भारते नवोदय-विद्यालय-समित्याः अष्टानां (८) क्षेत्राणां शते (१००) विद्यालयेषु आयोजिता आसीत्।

# हेलीपोर्टनिर्माणार्थं केन्द्रसर्वकारः दास्यति वित्तीयसाहाय्यम्;

## केन्द्रीयमन्त्रिणा राममोहन- नायडु- महोदयेन सह अमिलत् मुख्यमन्त्री सुक्खू

**हिमसंस्कृतवार्ताः- नवदेहली/शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः बुधवासरे नवदेहल्यां केन्द्रीय- नागरिक- विमाननमन्त्री किञ्जरापु- राममोहन- नायडुमहोदयेन सह साक्षात्कृतवान् तथा च हिमाचलप्रदेशे व्योमसम्पर्कं सुदृढीकर्तुं विमाननसंरचनायाश्च विस्ताराय सम्बद्धेषु विविधविषयेषु विस्तृतां चर्चां कृतवान्।

मुख्यमन्त्रिणा अस्मिन् उपवेशने काङ्गड़ा-विमानपत्तनस्य विस्तारप्रकरणं प्राथमिकतया उत्थाप्य प्रोक्तं यत् प्रदेशे पर्यटनविकासाय उत्तमः व्योम-सम्पर्कः अतीव महत्त्वपूर्णः वर्तते। सः अवदत् यत् पर्यटनं प्रदेशस्य अर्थव्यवस्थायां प्रमुखां भूमिकां निर्वहति। उन्नत-विमानसेवाभिः पर्यटकानाम् आवागमनं सुकरं भविष्यति, पर्यटन-गतिविधिभ्यश्च अधिकं प्रोत्साहनं लप्स्यते। सः केन्द्रीयमन्त्रिणं विज्ञापितवान् यत् काङ्गड़ा-विमानपत्तनस्य विस्ताराय भूमि-अधिग्रहणप्रक्रिया पूर्वमेव सम्पूर्णा कृता वर्तते।

### काङ्गड़ा-विमानपत्तनस्य तान्त्रिक- आर्थिक- साध्यतावृत्तान्तः मास-द्वये सज्जीभविष्यति

केन्द्रीय-नागरिक-विमानन-मन्त्रिणा सम्बद्ध-अधिकारिणः काङ्गड़ा-विमानपत्तनस्य विस्ताराय 'तान्त्रिक- आर्थिक- साध्यता- वृत्तान्तम्' मास-द्वयस्याभ्यन्तरे अन्तिमरूपं दातुं निर्दिष्टाः। सः अधिकारिभ्यः अस्य प्रकल्पस्य कृते योग्य-परामर्शदातृणां नियुक्तिं कर्तुं निश्चित-समयावधौ च प्रतिवेदनं सज्जीकर्तुं निदेशं दत्तवान्। मुख्यमन्त्री अवदत् यत् यदि अयम् वृत्तान्तः मासद्वये सज्जः भविष्यति, तर्हि काङ्गड़ा-विमानपत्तन-विस्तारस्य प्रक्रियायै गतिः लप्स्यते, योजना च तीव्रतया अग्रे सरिष्यति। सः भारतीय-विमानपत्तन-प्राधिकरणाय योजनायाः व्ययस्य यथार्थमूल्याङ्कनं विधातुं निवेदितवान्।



### हेलीपोर्ट-निर्माणाय वित्तीय-साहाय्य-प्रदाने सहमतिः

मुख्यमन्त्रिणा प्रदेशस्य विविधभागेषु विकस्यमानानां हेलीपोर्टविषयः अपि केन्द्रीयमन्त्रिणः समक्षम् उपस्थापितः। सः अवदत् यत् हिमाचलप्रदेशस्य विषमां भौगोलिक-स्थितिं वीक्ष्य सुदूर-दुर्गमक्षेत्रेषु उत्तम-व्योम-सम्पर्कस्य प्रदानाय, आपत्काले च द्रुत-सेवाः निश्चिताः विधातुं हेलीपोर्ट-जालस्य सुदृढीकरणम् आवश्यकं वर्तते। तेन हेलीपोर्टनिर्माणाय केन्द्रात् सहयोगस्य याचना कृता। केन्द्रीय-मन्त्रिणा 'उड़ान' योजनायाः अन्तर्गतं हिमाचलप्रदेशे हेलीपोर्ट-निर्माणार्थं वित्तीय- साहाय्यं दातुं स्व-स्वीकृतिः दत्ता।

**नियमित-विमान-सञ्चालन-विषयेऽपि मन्त्रणा**

उपवेशने शिमला-विमानपत्तनात् नियमित-विमान- सञ्चालनविषये अपि विचारविमर्शः जातः। केन्द्रीय- नागरिक- विमानन- मन्त्रिणा शिमलानगराय नियमित-व्योम-सम्पर्कं प्रदातुम् आवश्यकसहयोगस्य आश्वासनं दत्तम्। शिमला-विमानपत्तनस्य धावनमार्गस्य क्षमतायाः अनुगुणं योग्यानां विमानानां सञ्चालन-सम्भावनाः अपि विचारिताः। मुख्यमन्त्रिणा काङ्गड़ा-विमानपत्तनवत् शिमला- विमानपत्तनस्य अपि सुरक्षाव्यवस्थां 'केन्द्रीय- औद्योगिक- सुरक्षाबलस्य' स्थाने हिमाचलप्रदेश-आरक्षिभ्यः समर्पयितुम् आग्रहः कृतः। केन्द्रीयमन्त्रालयेन अस्मिन् प्रस्तावे सहमतिः प्रदर्शिता।

### दुर्गम-क्षेत्रेषु अपि श्रेष्ठः व्योम-सम्पर्कः (हवाई सम्पर्क) उपलब्धः भविष्यति

मुख्यमन्त्री अवदत् यत् राज्य-सर्वकारः हिमाचलप्रदेशे व्योमसम्पर्कं सुदृढं विधातुं कटिबद्धः वर्तते। सः न्यवेदयत् यत् काङ्गड़ा-विमानपत्तनस्य विस्तारेण, शिमला-विमानपत्तनात् नियमित-व्योम- सञ्चालनेन, प्रदेशे च हेलीपोर्ट-जालस्य सुदृढीकरणेन न केवलं पर्यटनस्य संवर्धनं भविष्यति, अपि तु प्रदेशस्य सुदूर-दुर्गम-क्षेत्रेषु निवसतं जनानां कृते अपि उत्तमः व्योम-सम्पर्कः प्राप्स्यते।

अस्मिन् उपवेशने मुख्यमन्त्रिणः प्रधान-परामर्शदाता रामसुभगसिंहः, प्रधान-सचिवः (वित्तम्) देवेशकुमारः, मुख्यमन्त्रिणः सचिवः राकेशकंवरः, प्रधान-आवासीय-आयुक्तः अजयकुमारः, केन्द्रीय- नागरिक- विमानन-मन्त्रालयस्य वरिष्ठाधिकारिणः उपस्थिताः आसन्।

# संसाधनानां दुरूपयोगापेक्षया तेषां सम्यग्- उपयोगः

## आवश्यकः, विद्यालयस्य विलयं युक्तियुक्तम्- उच्चन्यायालयः

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश- उच्चन्यायालयेन बिलासापुर-मण्डलस्य एकस्य सर्वकारीय- माध्यमिक-विद्यालयस्य निकटस्थे वरिष्ठ-माध्यमिक-विद्यालये विलयस्य सर्वकारस्य निर्णयः उचितः उद्घोषितः। न्यायालयेन स्पष्टीकृतं यत् न्यून-छात्र-सङ्ख्यायुक्ते विद्यालये संसाधनानां क्षयापेक्षया शिक्षा-विभागस्य शिक्षकाणां कर्मचारिणां च उपयोगः तादृशेषु विद्यालयेषु करणं तर्कसङ्गतं वर्तते, यत्र छात्राणां सङ्ख्या पर्याप्ता भवेत्। न्यायमूर्तेः अजयमोहनगोयलस्य न्यायमूर्तेः योगेशजसवालस्य च खण्डपीठेन प्रोक्तं यत् यदि स्थानान्तरित- विद्यालयस्य दूरी एतादृशी अभविष्यत् यत् छात्राणां कृते तत्र सुलभतया गमनम् अशक्यम् अभविष्यत्, तर्हि न्यायालयः अस्मिन् आदेशे हस्तक्षेपम् अकरिष्यत्; किन्तु पदमार्गेण केवलं ५०० मीटर, यानमार्गेण च १.५ किलोमीटर-मितायाः अल्पदूरेः कारणात् छात्रेभ्यः कोऽपि क्लेशः नास्ति।

**विद्यार्थिभ्यः प्राप्स्यते श्रेष्ठं शैक्षणिक-वातावरणम्**

न्यायालयेन उल्लिखितं यत् वर्तमान-स्थितिं दूरीं च विचार्य सर्वकारस्य अयं निर्णयः स्वेच्छाचारी तर्कहीनः वा नास्ति। संसाधनानाम् औचित्यपूर्ण-उपयोगाय बालेभ्यः श्रेष्ठ-सहपाठी-वातावरणस्य प्रदानाय च इदं संलयनं सर्वथा न्यायसङ्गतं वर्तते। उच्चन्यायालयेन विद्यालय-प्रबन्धन-समित्या प्रविष्टां याचिकां निरस्य अयं निर्णयः श्रावितः। याचिकाकर्त्या विद्यालय-प्रबन्धन-समित्या सर्वकारस्य १० जून २०२६ दिनाङ्कस्य सा अधिसूचना प्रत्याह्वानि‌िता आसीत्, यस्याम् राजकीय- माध्यमिक- पाठशाला- सण्डयार (शिक्षाखण्डः घुमारवीं प्रथमः, मण्डलं बिलासापुरम्) पिधानेन तस्याः संलयनं निकटस्थे राजकीय- वरिष्ठ- माध्यमिक- विद्यालये छत-मध्ये कृतम् आसीत्। सर्वकारस्य पक्षतः न्यायालयः विज्ञापितः यत् यस्मिन् विद्यालये बालाः स्थानान्तरिताः, तस्य दूरी मार्ग-मार्गेण केवलम्




१.५ किलोमीटर, पादसञ्चारेण च मात्रं ५०० मीटर अस्ति। अध्ययनस्य निरन्तरतां निश्चेतुम् एकादश (११) छात्राः राजकीय- वरिष्ठ- माध्यमिक-पाठशाला छतमध्ये, एकः छात्रश्च राजकीय-उच्च- विद्यालये अन्द्रोलीमध्ये समायोजितः।

# अधुना हिमाचले मादकतारहिता, वृत्ति- प्रदायिनी भविष्यति

## विजयायाः कृषिः, एक- बीघा- परिमितायै भूमये आवेदनानि आरब्धानि



**हिमसंस्कृतवार्ताः- कुल्लू।**
हिमाचलप्रदेशे विजयाकृषिं (भाङ्ग-कृषिम्) अधिकृत्य राज्यसर्वकारस्य नीतिः प्रवर्तिता जाता। अधुना कृषकाः अन्ये च उत्सुकाः जनाः निर्धारितप्रक्रियया सह अस्याः कृषेः कृते आवेदनं कर्तुं शक्ष्यन्ति। कुल्लू-सदर-विधानसभाक्षेत्रस्य विधायकः सुन्दरसिंहठाकुरः वार्ताहराणां प्रश्नानाम् उत्तरं ददत् एतां सूचनां प्रददात्। सः न्यवेदयत् यत् विजयाकृष्यर्थं प्रति-बीघा-परिमित-भूमेः आधारेण आवेदनं कर्तुं शक्ष्यते।

विधायकः स्पष्टीकृतवान् यत् प्रदेशे मादक-पदार्थरूपेण विजयायाः कृषेः प्रोत्साहनं न दीयते। प्रत्युत एतादृश्याः विजयायाः उत्पादने बलं दास्यते, यस्याः उपयोगः औद्योगिक- औषधीय-आवश्यकतानां पूरणाय कर्तुं शक्येत। सः अवदत् यत् विजयायाः तन्तुभिः (रेशा) वस्त्राणि, शालवस्त्राणि च निर्मातुं शक्यन्ते। अनेन ग्रामीणक्षेत्रेषु पारम्परिककृष्या सहैव जनानां कृते वृत्तिकायाः एकः नूतनः विकल्पः लप्स्यते।

### औषधीय-गुणानां कृते स्थापयिष्यन्ते उद्योगाः

तेन विज्ञापितं यत् येषु पादपेषु औषधीय-गुणाः भविष्यन्ति, तेषाम् उपयोगाय प्रदेशे उद्योगाः स्थापयिष्यन्ते। एतदर्थं बृहतीभ्यः संस्थाभ्यः हिमाचले निवेशार्थम् आमन्त्रणं दीयते। विधायकानुसारं 'डाबर' सदृशाः प्रमुखाः उद्योगाः प्रदेशे उत्पादन-घटकानां स्थापनाय अग्रे आगन्तुं शक्नुवन्ति। अनेन विजयायाः कृषितः आरभ्य तस्याः प्रसंस्करणम्, उत्पादानां निर्माणं यावत् च आजीविकायाः नूतनाः अवसराः सृष्टाः भविष्यन्ति।

### मादकतायाः स्थाने आजीविकायाम् बलम्

सुन्दरसिंहठाकुरः अवदत् यत् प्रदेशे तादृशानां जनानां कृतेऽपि वैकल्पिकवृत्तेः प्रबन्धः आवश्यकः अस्ति, ये दीर्घ-कालात् विजयायाः मादकद्रव्यैः सह संलग्नाः आसन्। सर्वकारस्य नीतेः मुख्यम् उद्देश्यं विजयासस्यं मादकसाधनरूपेण न वर्धयित्वा, अपि तु नियन्त्रित- उपयोगी- कृषि-माध्यमेन उद्योगं वृत्तिं च पोषयितुं वर्तते।

सः प्रोक्तवान् यत् ग्राम-स्तरं यावत् अस्याः नीतेः प्रचारः विधास्यते, येन जनाः प्रक्रियाम् उपयोगं चावगन्तुं शक्नुयुः। कृषकाः बोधयिष्यन्ते यत् कस्य प्रकारस्य विजयाकृषेः अनुमतिः दीयते, कस्मिंश्च क्षेत्रे अस्य उपयोगः भवितुं शक्नोति।

### वस्त्रतः आरभ्य औषध-निर्माणं यावत् उपयोगः

विजयायाः तन्तुभिः वस्त्राणि शाल-वस्त्राणि च निर्मातुं शक्यन्ते। तत्रैव औषधीय-गुण-युक्तायाः विजयायाः उपयोगेन औषधानाम् अन्येषां च औद्योगिक- उत्पादानां निर्माणाय अपक्व-सामग्री सज्जीभवितुं शक्नोति। सर्वकारस्य योजना एतस्मिन्नेव नियन्त्रित-उपयोगे केन्द्रिता वर्तते।

एवं सति हिमाचलप्रदेशे विजया-कृषिसम्बद्धा नूतना नीतिः ग्रामीण-अर्थव्यवस्थायाः कृते एकस्य वैकल्पिक-प्रतिमानस्य रूपेण दृश्यते। यदि कृषिः, प्रसंस्करणम्, उद्योगाश्च परस्परं संयोज्यन्ते, तर्हि कृषकैः सहैव स्थानीयस्तरे युवभ्यः अपि आजीविकायाः अवसराः प्राप्स्यन्ते।

तथापि विजया-कृषिविषये नियमानां दृढतया पालनम् अनिवार्यं भविष्यति। विधायकेन स्पष्टतया प्रोक्तं यत् मादकप्रयोजनेभ्यः विजयासस्यं न वर्धयिष्यते। कृषेः एकमात्रम् उद्देश्यम् औद्योगिक-वस्त्र- औषधीय-उत्पादनमेव भविष्यति।

# हिमाचलप्रदेशे कार्यं स्तब्धम्,

## देहलीयात्रायाः वेगः तीव्रः; सर्वकारोपरि प्रतिपक्षनेता जयरामठाकुरस्य व्यङ्ग्यम्



**हिमसंस्कृतवार्ताः- मण्डी।** पूर्वमुख्यमन्त्री प्रतिपक्षनेता च जयरामठाकुरः प्रान्तस्य काङ्ग्रेससर्वकारोपरि तीक्ष्णं प्रहारं कृतवान्। तेनोक्तं यत् सर्वकारस्य सत्ताप्राप्तेः लगभग चत्वारः वर्षाणि व्यतीतानि, तथापि प्रान्तसर्वकारः अद्य अपि स्खलति। विकासकार्याणि प्रभावितानि सन्ति, जनानाम् समसामस्यानां समाधानम् अपि न भवति। जयरामठाकुरः अवदत् यत् प्रान्तस्य जनता सर्वकारात् विकासाय, सुप्रशासनाय, स्वानां समस्यानां समाधानाय च अपेक्षां कृतवती आसीत्, परन्तु वर्तमानायां परिस्थितौ जनाः निराशां प्राप्नुवन्ति। तेन आरोपः कृतः यत् सर्वकारस्य प्राथमिकाः पक्षाः प्रान्तस्य जनतायाः समसामस्यातः विमुक्ताः अन्यत्र दृश्यन्ते। प्रतिपक्षनेता व्यङ्ग्यं कुर्वन् अवदत् यत् प्रान्तस्य सञ्चालनापेक्षया मुख्यमन्त्रिणा सह सम्पूर्णमन्त्रिमण्डलं देहल्याः चक्करं (भ्रमणम्) करोति। तेनोक्तं यत् मन्त्रिभिः प्रान्ते एव स्थित्वा जनतायाः समस्याः श्रोतव्याः, विकासकार्याणां च समीक्षा कर्तव्या, परन्तु तेषां भूयिष्ठः समयः देहल्याम् एव व्यतीर्यते। तेनोक्तं यत् सर्वकारस्य लगभग चतुर्वर्षाणां कार्यकालस्य अवधौ प्रान्ते बहुविधानि विकासकार्याणि प्रभावितानि जातानि। सामान्यजनाः विविधानाम् समसामस्यानां सामनां कुर्वन्ति। जयरामठाकुरः सर्वकारं प्रान्तस्य हिताय दृढपदानां ग्रहणात् जनतासम्बद्धानां च विषयाणां प्राधान्याधारितसमाधानाय याचाम् अकरोत्। तेनोक्तं यत् सर्वकारैः राजनीतिकगतिविधीनाम् अपेक्षया प्रान्तस्य विकासाय जनहिताय च ध्यानं केन्द्रितव्यम्। यस्य विश्वासस्य आधारेण जनता काङ्ग्रेसपक्षाय सत्तां समर्पितवती आसीत्, तस्य विश्वासस्य परिपूर्त्यै सर्वकारेण धरातले कार्यं करणीयम्।

# बिहारराज्ये खाद्यसंस्करणक्षेत्रस्य नूतनविस्तारः- दुबईनगरे ‘AIM Global Foundation’ इत्यनेन सह सर्वकारस्य महत्त्वपूर्णः सन्धिः।

**हिमसंस्कृतवार्ताः- राघवनाथ झा, दुबई**
बिहारराज्यं कृषिखाद्य-औद्योगिकक्षेत्रयोः जागतिके स्तरे प्रतिष्ठापयितुं राज्यसर्वकारेण एकं दृढं पदम् अग्रे सारितम्। दुबईनगरे आयोजिते ‘AIM (वार्षिक- निवेश- सम्मेलनम्) २०२६’ इत्यस्मिन् अधिवेशने बिहारसर्वकारस्य उद्योगविभागस्य तथा च ‘AIM Global Foundation’ इत्यस्य प्रतिष्ठानस्य मध्ये सामञ्जस्यपत्रे विधिवत् हस्ताक्षरम् अभवत्। अस्य ऐतिहासिकसन्धेः मुख्यमुद्देश्यं बिहारराज्ये एकस्य समर्पित-खाद्यसंस्करणोद्यानस्य एकीकृत-कृषिखाद्यसङ्कुलस्य च संवर्धनं वर्तते।

खातदेशानां निवेशेन सज्जीभविष्यति खाद्यसंस्करणकेन्द्रम्। अस्याः सहभागितायाः प्रभावेण संयुक्त-अरब-अमीरात देशात्, विस्तीर्ण-खातक्षेत्रेभ्यः (खाड़ीक्षेत्रेभ्यः) च लब्धप्रतिष्ठेभ्यः निवेशकेभ्यः, बहुराष्ट्रीयसंस्थानेभ्यश्च महती पूञ्जी समाकृष्टा भविष्यति। अस्याः दूरगामिन्याः योजनायाः लक्ष्यं बिहारस्य विपुल-कृषिसम्पदः समुचितम् उपयोगं विधाय खातदेशानां खाद्यवितरणशृङ्खलायै राज्यं प्रमुखस्रोतरूपेण, प्रशस्तसंस्करणकेन्द्ररूपेण च प्रतिष्ठापयितुम् अस्ति।

### वरिष्ठाधिकारिणां सान्निध्ये सम्पन्नं हस्ताक्षरम्

एषः सन्धिः बिहारसर्वकारस्य उद्योगमन्त्रिण्याः श्रेयसीसिंहमहोदयायाः गरिमामय्याम् उपस्थितावेव सम्पन्नः जातः। सामञ्जस्यपत्रे बिहार-उद्योगविभागस्य सचिवेन कुन्दनकुमारेण तथा ‘AIM Global Foundation’ इत्यस्य अध्यक्षेण महामहिमेन दाऊद अल-शेजावी-वर्येण हस्ताक्षरं कृतम्। अस्मिन् अवसरे बिहारस्य उद्योगनिदेशकः मुकुलकुमारगुप्तः अपि समुपस्थितः आसीत्।



### स्थानीयकृषकेभ्यः समुपलप्स्यते वैश्विकविपणिः

उद्योगमन्त्रिणी श्रेयसीसिंहः अवोचत् यत् इयं सहभागिता राज्यम् अभीष्ट-निवेशस्थलरूपेण परिवर्तयितुं मीलप्रस्तरः सिद्धा भविष्यति। यूएई-देशस्य निवेशेन निर्मीयमाणम् इदम् उद्यानम् स्थानीयकृषकान् कृष्याधारितोद्योगांश्च साक्षात् अन्ताराष्ट्रियविपणिभिः सह संयोजयिष्यति। उद्योगसचिवः कुन्दनकुमारः चापि अवदत् यत् अयं सन्धिः राज्यस्य कृषितन्त्रे प्रत्यक्षवैश्विकनिवेशस्य, उभयोः पक्षयोः दृढसंस्थागतसहयोगस्य च सुदृढां भित्तिं स्थापयिष्यति।

# विज्ञानात् पर्यटनं यावत् हिमाचलस्य कृते महदोपहाराय सज्जीकरणम्

## मुख्यमन्त्री सुक्खूमहोदयः केन्द्रीयमन्त्रिणः समक्षं न्यदधात् प्रस्तावान्







**हिमसंस्कृतवार्ताः- शिमला/नवदेहली।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खु-महोदयः केन्द्रीय- विज्ञान- प्रौद्योगिकी तथा पृथिवी- विज्ञान- राज्यमन्त्रिणा (स्वतन्त्रप्रभारः) डॉ. जितेन्द्रसिंहेन सह साक्षात्कृतवान्, हिमाचलप्रदेशे च विज्ञान-प्रौद्योगिकी-आधारित-प्रयास-योजनानां सुदृढीकरण-सम्बद्धेषु विविध-प्रस्तावेषु विस्तृतां चर्चां कृतवान्। अस्मिन् अवसरे विशेषतया राज्यस्य सुदूर-जनजातीयक्षेत्रेषु विज्ञानप्रौद्योगिक्योः लाभानां प्रापणाय विचारविमर्शः सम्पादितः। मुख्यमन्त्रिणा केन्द्रीयमन्त्री राज्यसर्वकारस्य तस्य प्रस्तावस्य विषये विज्ञापितः, यदन्तर्गतं लद्दाखस्य हान्ले-क्षेत्रे सञ्चालित- सफल- खगोलीय- प्रकल्पानाम् अनुसरणेन लाहौल स्पीति- पाङ्गी- इत्यनयोः उच्च- पार्वत्य- जनजातीय- क्षेत्रयोः खगोलविज्ञानं, खगोल-भौतिकी-केन्द्रस्य च स्थापनायाः योजना अस्ति।
सः अवदत् यत् एतेषां क्षेत्राणां खगोलीय-अनुसन्धाननिरीक्षणाभ्याम् अनुकूलपरिस्थितीनाम् उपयोगं कृत्वा प्रस्तावितं केन्द्रं विकसितं कर्तुं शक्यते। अनेन स्थानीययुवभ्यः छात्रेभ्यश्च खगोलविज्ञाने रुचिसंवर्धनस्य अवसराः लप्स्यन्ते, राज्यस्य जनजातीयक्षेत्रेषु च सतत- ज्ञान-आधारित-पर्यटनस्य नूतनाः अवसराः सृष्टाः भविष्यन्ति।

**नीलधूपपुष्प-कृषेः विस्तारः**
मुख्यमन्त्रिणा हिमाचलप्रदेशे नीलधूपपुष्प- सस्य-कृषेः संवर्धनार्थम् अपि चर्चा कृता तथा च 'वैज्ञानिक एवम् औद्योगिक- अनुसन्धान -परिषद्' माध्यमेन राज्ये लैवेंडरकृषेः 'प्रदर्शनस्थलानां' विस्ताराय सहयोगस्य याचना कृता। तेन प्रोक्तं यत् प्रदर्शनस्थलानाम् अधिकसङ्ख्यायां स्थापनात् कृषकेभ्यः अस्याः उपयुक्तानां कृषिप्रविधीनाम् अवगमने, अस्य सस्यस्य विषये जागरूकता-वृद्धौ, वैकल्पिक- लाभप्रद- सस्यरूपेण च अस्य अङ्गीकरणे साहाय्यं लप्स्यते।

**विद्यालयेषु विज्ञान-सङ्ग्रहालय-स्थापना**
छात्रेभ्यः विज्ञान-प्रौद्योगिक्याः क्षेत्रे अधिकाधिकान् अवसरान् प्रदातुं मुख्यमन्त्रिणा हिमाचलप्रदेशस्य आकांक्षी-विकासखण्डेषु विद्यालयेषु विज्ञान-सङ्ग्रहालय- स्थापनाय साहाय्यम् आवेदितम्। सः न्यवेदयत् यत् एतादृशाः विज्ञान-सङ्ग्रहालयाः विद्यार्थिषु वैज्ञानिकजिज्ञासां संवर्धयितुं सहैव तेभ्यः अनुभवात्मकशिक्षणस्य अवसरान् प्रदास्यन्ति, विज्ञान- प्रौद्योगिकी- नवाचाराणां प्रति च तेषां रुचिं प्रोत्साहयिष्यन्ति।

### स्वचालित- वर्षामापी- ऋतु- केन्द्राणां सुदृढीकरणम्

स्थानीयस्तरे ऋतु- निरीक्षणजालस्य सुदृढीकरणस्य महत्त्वं प्रतिपाद्य मुख्यमन्त्रिणा प्रत्येकं ग्राम-पञ्चायते 'स्वचालित- वर्षामापी-यन्त्रस्य', विकासखण्डस्तरे 'स्वचालित- ऋतु-केन्द्रस्य' स्थापनायाः कार्यं तीव्रं कर्तुं निवेदितम्। सः अवदत् यत् अनेन पञ्चायत-विकासखण्ड-स्तरे वृष्टेः अन्येषां च वातावरणीय-मानदण्डानां सटीकं वास्तवकालिकं च तथ्यं प्राप्स्यते। अनेन ऋतु-निरीक्षणव्यवस्था अधिका वैज्ञानिकी व्यवस्थिता च भविष्यति, कृषकाणां कृते च स्थान- विशिष्ट-ऋतु- सम्बन्धि- सूचनायाः उपलब्ध्या श्रेष्ठ- कृषि-योजना- निर्माणे उचितनिर्णयग्रहणे च साहाय्यं भवितुं शक्ष्यति।
उपवेशने हिमाचलप्रदेशे विज्ञान- प्रौद्योगिकी-आधारितानां हस्तक्षेपाणां सुदृढीकरणाय अन्येषां विषयाणाम् अपि समीक्षा कृता। विशेषतः राज्यस्य सुदूर-जनजातीय-क्षेत्रेषु वैज्ञानिक-अनुसन्धानस्य, नवाचारस्य, आधुनिकप्रौद्योगिक्याश्च लाभानां विस्तारे बलं दत्तम्। डॉ. जितेन्द्रसिंहः मुख्यमन्त्रिणा उत्थापितेषु विषयेषु प्रस्तावेषु च सकारात्मक-प्रतिक्रियां प्रदर्शयन् सर्वासां याचनानां सहानुभूतिपूर्वकं विचारस्य आश्वासनं प्रादात्। सः मन्त्रालयस्य पक्षतः प्रदेशाय सर्वसम्भवं साहाय्यं सहयोगं च प्रदातुम् आश्वस्तवान्।

# लाहला-ग्रामे खण्डस्तरीय-क्रीडा-स्पर्धायाः समापनम्: राजकीय-वरिष्ठ-माध्यमिक-विद्यालय-जिया-छात्राभिः उत्कृष्टं प्रदर्शनं कृतम्



**हिमसंस्कृतवार्ता।** ६ दिनाङ्कात् ८ दिनाङ्कं यावत् आयोजिताः नवदश-वर्ष-पर्यन्तानां (१९) छात्राणां खण्डस्तरीय-क्रीडा-स्पर्धाः लाहला-स्थित-राजकीय-वरिष्ठ-माध्यमिक-विद्यालये सम्पन्नाः। अस्मिन् आयोजने राजकीय-वरिष्ठ-माध्यमिक-विद्यालयस्य जिया-संस्थायाः चतुर्दश (१४) छात्राः कन्दुक-क्षेपण (वॉलीबॉल), कबड्डी, प्रपतकन्दुक (बैडमिंटन), चतुरङ्ग (शतरंज) स्पर्धासु भागं गृहीतवत्यः।तत्र विद्यालयस्य छात्राः ऋद्धिमा, अञ्जली, सेजल, इषिता च चतुरङ्ग-प्रतियोगितायां प्रथमं स्थानं प्राप्तवत्यः। अपि च कन्दुक-क्षेपण-स्पर्धायां (वॉलीबॉल) पल्लवी, रिया, अवनी, तन्वी, वंशिका, ऋद्धिमा, स्मृतिः, नैन्सी, रीतिका च शारीरिक-शिक्षकस्य श्रीविकासकुमार-महोदयस्य कुशल-मार्गदर्शने द्वितीयं स्थानं प्राप्य विद्यालयस्य, अभिभावकानां, शिक्षकाणां, जिया-ग्रामस्य च गौरवं वर्धितवत्यः। अस्य अवसरस्य अन्ते विद्यालयस्य प्रधानाचार्यः श्री-रामप्रकाशवर्धन-महोदयः छात्रेभ्यः, शिक्षकेभ्यः, भागं गृहीतवतीभ्यः छात्राभ्यश्च शुभाशयान् प्रदत्तवान् तथा च भविष्येऽपि एतादृशं प्रशंसनीयं प्रदर्शनं कर्तुं सर्वाः प्रेरयामास।

# अनुरागठाकुराय पुनः 'सांसदरत्न-पुरस्कारः', तस्य नेतृत्वयुतायै संसदीयसमितये अपि 'संसद्रत्न-पुरस्कारः'



पूर्व-केन्द्रीयमन्त्री हमीरपुरस्य सांसदः च अनुरागसिंहठाकुरः पुनः एकवारं 'सांसदरत्न-पुरस्कारेण' सम्मानितः जातः। तस्य अध्यक्षत्वयुता अङ्गार-खनि-इस्पातसम्बद्धा संसदीयस्थायिसमितिः अपि वर्षे २०२६ तस्य प्रतिष्ठितेन 'संसद्रत्न-पुरस्कारेण' समादृता। अयम् पुरस्कारः नवदेहल्यां स्थिते डॉ. अम्बेडकर-अन्तर्राष्ट्रिय-केन्द्रे आयोजिते षोडशे संसद्रत्न-पुरस्कार-समारोहे मूलप्रतिवेदनेषु उत्कृष्टप्रदर्शनाय प्रदत्तः। अनुरागस्य नेतृत्वयुता इयं समितिः अस्मिन् वर्षे संसदः उभयोः सदनयोः चयनितासु तासु चतुर्षु संसदीयसमितिषु समाविष्टा वर्तते, याभ्यः संसदः प्रभावि-निरीक्षणाय उत्कृष्टकार्याय च अयं राष्ट्रिय-सम्मानः समर्पितः।

# बिहारसर्वकारस्य मेधावीछात्रसम्मानसमारोहः सम्पन्नः,

## प्रथमस्थानप्राप्तेभ्यः द्विलक्षरुप्यकाणि, सर्वेभ्यः संगणक-यन्त्रस्य कृते एकपंचाशत्सहस्ररुप्यकाणि अपि प्रदत्तानि





हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, भागलपुरम्
बिहारसर्वकारस्य शिक्षाविभागेन बिहार- विद्यालय-परीक्षासमित्या च संयुक्तरूपेण मुख्यमंत्रीकार्यालये मेधावीछात्रसम्मानसमारोहः आयोजितः। अस्मिन् समारोहे १६८ मेधाविनः विद्यार्थिनः तेषां परिवारसदस्याश्च सम्मानिताः। समारोहस्य मुख्यातिथिः माननीयः मुख्यमन्त्री सम्राट् चौधरीमहोदयः आसीत्। तेन सह उभौ उपमुख्यमन्त्रिणौ विजयकुमारचौधरीमहोदयः, बिजेन्द्रप्रसादयादवमहोदयः च विशिष्टातिथिरूपेण उपस्थितौ आस्ताम्। शिक्षामन्त्री मिथिलेश तिवारीमहोदयः समारोहस्य अध्यक्षताम् अकरोत्।

**पुरस्कार-राशि-विवरणम्**

१. इंटरमीडिएट- मैट्रिकपरीक्षयोः प्रथमस्थानप्राप्तेभ्यः- २ लक्षं रुप्यकाणि
२. द्वितीयस्थानप्राप्तेभ्यः- १.५ लक्षं रुप्यकाणि
३. तृतीयस्थानप्राप्तेभ्यः- १ लक्षं रुप्यकाणि
४. इंटरमीडिएट- परीक्षायां चतुर्थ- पंचम-स्थानप्राप्तेभ्यः- ३०-३० सहस्राणिरुप्यकाणि
५. मैट्रिकपरीक्षायाचतुर्थतः दशमस्थानपर्यन्तं- २०- २० सहस्राणिरुप्यकाणि

मेधाविनां प्रोत्साहनार्थं सर्वेभ्यः पुरस्कृतेभ्यः लैपटॉपक्रेतुम् अतिरिक्तरूपेण ५१ सहस्रं रुप्यकाणि अपि दत्तानि।

**अस्मिन् अवसरे मुख्यमन्त्रीमहोदयेन उक्तम्-**

अद्य दिवसः अत्यन्तं महत्वपूर्णः अस्ति। पूर्वं दिसम्बरमासे सम्मानकार्यक्रमः भवति स्म, परन्तु परीक्षापरिणामानन्तरं शीघ्रमेव सम्मानं भवितव्यम्। भविष्यत्काले अपि परिणामघोषणायाः एकमासाभ्यन्तरे अयं समारोहः भविष्यति।" बिहार राज्यं निरन्तरं परिवर्तमानम् अस्ति। यदा प्रधानमंत्री नरेन्द्रमोदीमहोदयः तृतीयवारं प्रधानमंत्रीपदस्य शपथं नीत्वा सर्वप्रथमं नालन्दाविश्वविद्यालयम् आगतवान्। ३०% छात्राः विद्यालयात् महाविद्यालययात् बहिः गताः आसन्, ते पुनः आगतवन्तः। सप्तलक्षाधिकशिक्षकाः बिहारस्य शिक्षणकार्ये संलग्नाः सन्ति।बिहारस्य बालकाः केवलं सर्वकारीयसेवां प्रति धावन्ति। जीवनं सुरक्षितं कर्तुम् इच्छन्ति। परन्तु अहं वदामि-भवन्तः जीविकोपार्जनग्रहीतारः न भूत्वा जीविकोपार्जनदातारः भवन्तु। औद्योगिकक्षेत्रे बिहार प्रदेशः अग्रे गच्छन् अस्ति, अतः स्वावलम्बिनः भवन्तु।"

**समारोहे उपमुख्यमन्त्री महोदयेन उक्तम्-**

अद्य सम्मानितेभ्यः सर्वेभ्यः छात्रेभ्यः मम पक्षतः हार्दिक्यः शुभकामनाः सन्ति। यदा एनडीएसर्वकारः बिहारराज्ये स्थापितः, तदा एव बिहाराज्यस्य शिक्षाव्यवस्थायाः प्रशंसा सम्पूर्णे देशे श्रूयते। पूर्वं बिहारस्य शिक्षाव्यवस्था अत्यन्तं जीर्णशीर्णा आसीत्। अद्य तु बिहार- विद्यालय-परीक्षासमितिः सम्पूर्णे देशे अग्रे गता अस्ति। सम्पूर्णदेशे सर्वप्रथमं परीक्षा परिणामश्च बिहारसमित्या एव प्रकाश्यते। अतः अन्यराज्यस्य अधिकारिणः अस्माकं शिक्षाप्रणालीं द्रष्टुम् बिहारराज्यम् आगच्छन्ति। "तेन पुनः उक्तं- "मुख्यमन्त्रिणः विशेषध्यानं शिक्षाविभागस्य उपरि अस्ति। यदा सर्वकारः आयव्ययपत्रं प्रस्तौति, तदा सर्वविभागेभ्यः अधिकं धनं शिक्षाविभागाय एव दीयते।"

सर्वे छात्राः पुरस्कारं प्राप्य प्रसन्नाः आसन्। सम्मानसमारोहानन्तरं मुख्यमंत्री छात्रैः छात्राभिः सह भोजनं वार्तालापं च अकरोत्।प्रतिभासम्मानेन समेषाम् अन्यछात्राणां मनसि अध्ययनाय रुच्योत्पादनं भवति। एषः सर्वकारस्य कार्यक्रमः प्रशंसनीयः आसीत्।

# शिक्षकाणामधिकाराय शिक्षासुधाराय च डॉ. दिव्यज्योतिः जनसुराजदले सम्मिलीता



**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्**

बिहार-विधानपरिषदः निर्वाचनानां पूर्वसज्जायाः मध्ये 'चाणक्य- कॉलेज- ऑफ- हायर- स्टडीज' महाविद्यालयस्य सह-प्राध्यापिका (एसोसिएट प्रोफेसर) डॉ. दिव्यज्योतिः भौमवासरे स्वकीयैः शतशः सहकर्मिभिः सह 'जनसुराज'दलस्य विधिवत् सदस्यतां गृहीतवती। दलस्य संस्थापकस्य प्रशान्तकिशोरस्य, दलाध्यक्षस्य गरिमामय्याम् उपस्थितौ सा दले प्रविष्टा।

**नैषः केवलं राजनैतिकः निर्णयः, अपि तु शिक्षकसमुदायस्य स्वरः**

सदस्यताग्रहणावसरे डॉ. दिव्यज्योतिः अवदत् यत् अयं न केवलं राजनैतिकः निर्णयः, अपितु वर्षानुवर्षेभ्यः शिक्षाक्षेत्रे शिक्षकेभ्यश्च क्रियमाणानां प्रयत्नानां विस्तृते लोकतान्त्रिकमञ्चे प्रवर्धनस्य नूतनः आरम्भः अस्ति। तया स्पष्टीकृतं यत् पाटलिपुत्र- नालन्दा- नवादानगराणां शिक्षकैः सह दीर्घात् संवादात् लब्धसमर्थनाच्च परमेव अयं सङ्कल्पः कृतः।

## २५ वर्षेभ्यः शिक्षासेवायाम् अनुभूताः चुनौतयः

प्रायः पञ्चविंशतिवर्षेभ्यः शिक्षाक्षेत्रे निरता डॉ. दिव्यज्योतिः प्रत्यपादयत् यत् विगतवर्षेषु तया शिक्षकाणां समस्याः, असुरक्षा, व्यावसायिकाश्च आह्वानानि अतिनिकटतः अनुभूतानि। तस्याः मतानुसारम्- "शिक्षकाणामधिकाराणां सङ्घर्षः एव वस्तुतः बिहारस्य भवितव्यस्य सङ्घर्षः वर्तते।"

**शिक्षाव्यवस्थायाः मेरुरूपेभ्यः शिक्षकेभ्यः सम्मानम् अनिवार्यम्**

शिक्षकाः शिक्षाव्यवस्थायाः मेरुदण्डस्वरूपाः सन्ति इति प्रतिपादयन्ती सा अकथयत् यत् शिक्षकेभ्यः समुचितं सम्मानं, सुरक्षिताः कार्यपरिस्थितयः, न्यायपूर्णा सेवाव्यवस्था, नीतिनिर्धारणे च सहभागितां विना शिक्षायां वस्तुतः सुधारः असम्भवः। गुणवत्तापूर्णशिक्षायाः कृते शिक्षकेभ्यः सम्मानजनकं प्रेरकावरणं दातव्यम्।

## नूतनबिहारस्य निर्माणाय नूतनशिक्षानीतेः आवश्यकता

जनसुराजे प्रवेशस्य औचित्यं प्रकटयन्ती सा न्यवेदयत् यत् बिहारस्य शासनविधाने विकासपद्धतौ च परिवर्तनं कामयमानानां जनानां कृते अयं महत्त्वपूर्णः मञ्चः जातः। सा विश्वासमकरोत् यत् नूतनबिहारस्य रचना नूतनशिक्षादृष्ट्या सहैव सम्भविष्यति।

# आप्लव-विभीषिकायां कृषकाणां साहाय्यम्- आधुनिक-कृषियन्त्रेषु

## अशीतिप्रतिशतं यावद् आर्थिकानुदानम्




**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्**
बिहारसर्वकारेण राज्यस्य कृषकाणां कल्याणाय युगपदेव द्वे महत्त्वपूर्णे कार्ये प्रारब्धे। आप्लवेन (जलौघेन/ प्लवनेन) प्रभावितेभ्यः कृषकेभ्यः समुचितं साहाय्यं प्रदातुं शस्यक्षतेः विस्तृतपरीक्षणाय निर्देशः प्रदत्तः। अपरञ्च, कृषिकर्म आधुनिकं मन्दव्ययं च विधातुं कृषियन्त्रीकरणयोजनान्तर्गतम् आधुनिक-कृषियन्त्रेषु चत्वारिंशतः अशीतिप्रतिशतं (४०-८०%) यावद् आर्थिकानुदानस्य व्यवस्था कृता।

### आप्लव-प्रभावितानां शस्यानां भविष्यति प्रामाणिकं मूल्याङ्कनम्

कृषिमन्त्रिणा विजयकुमारसिंहेन बुधवासरे कृषिविभागस्य वरिष्ठाधिकारिभिः सह उच्चस्तरीय-समीक्षोपवेशने राज्ये आप्लवस्थितेः प्रभावितानां शस्यानां च गहनं पर्यालोचनं कृतम्। सः सर्वान् जनपदीय- कृष्यधिकारिणः आप्लवग्रस्तक्षेत्राणां साक्षात् स्थलीयनिरीक्षणं कृत्वा प्रामाणिकशस्यक्षतेः अद्यतनविवरणं शीघ्रमेव समर्पयितुम् आदिदेश। मन्त्रिणा प्रतिपादितं यत् विस्तृतमूल्याङ्कनस्य आधारेणैव कृषकेभ्यः नियमानुगुणं शस्यक्षतिपूर्तिः अन्यावश्यकसाहाय्यं च प्रदास्यते। यदि कस्मिंश्चित् क्षेत्रे शस्यानि सम्पूर्णतया विनष्टानि, तर्हि अग्रिमशस्यचक्राय मृत्तिकायाः ऋतोश्चानुकूलं वैकल्पिकशस्य-सम्बद्धाः तान्त्रिकपरामर्शाः कृषकेभ्यः दीयन्ते। मन्त्री न्यवेदयत्- "अस्मिन् सङ्कटकाले वयं स्वकीयान् अन्नदातॄन् एकाकिनः न त्यक्ष्यामः।"

### लघु-सीमान्तकृषकाणां कृते आधुनिकयन्त्राणां सुलभता

कृषिमन्त्रिणा स्पष्टीकृतं यत् कृषियन्त्रीकरणयोजनायाः अन्तर्गतं राज्ये यन्त्रीकरणं तीव्रगत्या प्रवर्ध्यते। योजनान्तर्गतं २६७ संविभाजित-भाटककेन्द्राणि प्रत्येकं केन्द्राय दश-लक्षरूप्यकाणां (१०,००,०००) स्थापयिष्यन्ते। परियोजनाव्यये चत्वारिंशत्-प्रतिशतं (४०%), अधिकतमं चत्वारि लक्षरूप्यकाणि यावद् अनुदानं लप्स्यते। एतदतिरिच्य अष्टत्रिंशत् (३८) कृषियन्त्रकोशाः स्थाप्यन्ते, येषु पात्रसमूहेभ्यः अशीतिप्रतिशतं (८०%), अधिकतमम् अष्टलक्षरूप्यकाणि अनुदानं दीयते। शस्यावशेषप्रबन्धनाय पर्यावरणसंरक्षणाय च द्विशतं (२००) विशिष्टानि भाटककेन्द्राणि स्थापयिष्यन्ते, येषु द्वादश-लक्षरूप्यकाणां साहाय्यं देयम् अस्ति। आधुनिक-व्योमयान-प्रविधेः (ड्रोन-तकनीकस्य) प्रसाराय ४८० 'कृषक-व्योमयान-केन्द्राणि' अपि प्रतिष्ठितानि भविष्यन्ति। व्यक्तिगतकृषकेभ्यः षडशीति (८६) प्रकारकेषु आधुनिकयन्त्रेषु चत्वारिंशतः अशीतिप्रतिशतं यावद् अनुदानं प्राप्स्यते।

### पारदर्शिन्याः प्रणाल्याः माध्यमेन साहाय्यहस्तान्तरणम्

मन्त्रिणा उक्तं यत् निर्धनाः लघु-सीमान्तकृषकाः महार्घाणि यन्त्राणि क्रेतुं न शक्नुवन्ति; अतः भाटकेन आधुनिकयन्त्रोपलब्धौ सत्यां तेषां समयस्य धनस्य च रक्षणं भविष्यति, उत्पादकता च संवर्धिष्यते। अस्याः योजनायाः कृते सितम्बरमासस्य अष्टमदिनाङ्कादेव अन्तर्जालमाध्यमेन आवेदनप्रक्रिया प्रारब्धा। लाभान्वितानां चयनं पारदर्शी-भाग्यचक्रपद्धत्या (लॉटरी- माध्यमेन) भविष्यति, साहाय्यराशिः च प्रत्यक्षलाभहस्तान्तरणपद्धत्या साक्षात् कृषकाणां वित्तीयकोशेषु प्रेषयिष्यते। योजनायाः क्रियान्वयने कस्यामपि अनियमिततायां सत्यां कठोरदण्डस्य निर्देशः प्रदत्तः।

# आर्थिकसुरक्षायाः दृढाधारः बीमा- आईसीसीसङ्गमे समावेशिविकासाय नवोन्मेषमन्थनम्

**हिमसंस्कृतवार्ताः डॉ. राघव नाथ झा, पाटलिपुत्रम्**
*'इण्डियन चेम्बर ऑफ कॉमर्स' (आईसीसी) इत्यस्य तत्त्वावधाने आयोजितः तृतीयः बीमा-सङ्गमः; सर्वसाधारणाय आर्थिकसुरक्षाप्रदानस्य नूतनप्रविधयः चर्चिताः।*
इण्डियन चेम्बर ऑफ कॉमर्स' (आईसीसी) इत्यस्याः संस्थायाः आयोजने बुधवासरे पाटलिपुत्रस्य 'होटल मौर्या' इत्यत्र "समावेशिविकासाय बीमाक्षेत्रे नवोन्मेषः" इति विषये तृतीयस्य 'आईसीसी- इन्श्योरेन्स-कॉन्क्लेव-२०२६' इत्याख्यस्य सङ्गमस्य भव्यम् आयोजनं सम्पन्नम्। अस्मिन् सम्मेलने बीमाक्षेत्रस्य तज्ज्ञैः, उद्योगजगतः नेतृभिः, सर्वकारीयसंस्थाभिः, चिकित्सालयैः, वित्तीयक्षेत्रस्य च प्रतिनिधिभिः सहभागिता कृता। तैः बीमासेवायाः विस्ताराय, परिवर्तमानानां सङ्कटानाम् अनुरूपाणां नूतनयोजनानां विकासाय, जनसामान्येभ्यः च सुदृढायाः आर्थिकसुरक्षायाः प्रदानाय गहनं मन्थनं कृतम्।

### उद्घाटनसत्रे आर्थिकाधारस्य सुदृढीकरणाय आह्वानम्

उद्घाटनसत्रे आईसीसी-बिहारराज्यस्य अध्यक्षेण प्रभातकुमारसिन्हेन स्वागतभाषणं प्रस्तुतम्। 'आईसीआईसीआई लोम्बार्ड' इत्यस्य उपाध्यक्षः देवव्रतपाण्डेयः विचारगोष्ठ्याः मुख्यविषयम् उपस्थापितवान्। भारतीय-जीवन-बीमा-निगमस्य क्षेत्रीयप्रबन्धकः प्रशान्तकुमारप्रसादः, रुबन-पाटलिपुत्र-चिकित्सालयस्य निदेशकः डॉ.



सत्यजीतसिंहः, बिहार-इण्डस्ट्रीज-एसोसिएशन (BIA) इत्यस्य अध्यक्षः रामलालखेतानः, तथा च 'ईएसआईसी' इत्यस्य क्षेत्रीयनिदेशकः सीए-निरञ्जनकुमारः अपि स्वविचारान् प्राकटयन्। मुख्यातिथिरूपेण समुपस्थितः बिहारविधानसभायाः अध्यक्षः प्रेमकुमारः आर्थिकसुरक्षायाः बीमाक्षेत्रस्य च पावनं महत्त्वं प्रतिपादितवान्। सत्रस्यान्ते आईसीसी-वित्तसमित्याः अध्यक्षेण सीए-रितेशानन्देन धन्यवादज्ञापनं कृतम्।

### प्रथम-प्राविधिकसत्रे सामान्यबीमायाः नूतनदृष्टिः

"बीमातः प्रत्यास्थतां प्रति- भारतस्य उद्भवतां सङ्कटानाम् अनुरूपा सामान्यबीमायाः नूतना दृष्टिः" इति शीर्षके आयोजिते प्रथमे प्राविधिकसत्रे जलवायुपरिवर्तनम्, अन्तर्जाल-अपराधाः (साइबर-अपराधाः), सम्भरणशृङ्खलायाः (सप्लाई चेन) विघाताः, सूक्ष्म- लघु- मध्यमोद्योगाः, नवपरिवहनव्यवस्था इत्यादयः विषयाः चर्चिताः। तज्ज्ञाः सङ्कटाधारित-बीमायोजनासु, अन्तर्जाल-सुरक्षाबीमासु, जलवायुसङ्कटसंरक्षणे, तथ्याधारित-मूल्याङ्कने, प्रविधेः साहाय्येन सत्वर-दावानिस्तारणे च विशेषबलम् अददुः।

### द्वितीयसत्रे जीवनबीमायाः दशाधिककोटि- परिवारेषु विस्तारः

"बीमापत्रात् (पॉलिसीतः) सुरक्षां यावत् भारतस्य अग्रिम-दशकोटि-परिवाराणां कृते जीवनबीमायाः नवचिन्तनम्" इति द्वितीये प्राविधिकसत्रे जीवनबीमायाः व्याप्तिवर्धनार्थं विमर्शः जातः। सत्रेऽस्मिन् सावधिकबीमायाः, अल्पव्यययोजनानां, वित्तीयसाक्षरतायाः, उपभोक्तृविश्वासस्य, अङ्कीयमाध्यमेन बीमावितरणस्य च भूमिका निरूपिता। कृत्रिमबुद्धेः तथ्याधारित- जोखिम-मूल्याङ्कनस्य च भविष्यति बीमाक्षेत्रे महत्त्वपूर्णा उपादेयता स्वीकृता।

### आर्थिकसशक्तीकरणाय बीमा अनिवार्यम्

सम्मेलने उपस्थिताः विशारदाः उदघोषयन् यत् परिवर्तमाने युगे बीमा केवलं जातेः क्षतेः पूरणसाधनं नास्ति, अपि तु सङ्कटप्रबन्धनस्य आर्थिकसशक्तीकरणस्य च प्रभावी मार्गः वर्तते। सर्वसुलभप्रक्रियाभिः, पारदर्शितया, द्रुततर-दावानिस्तारणेन च जनसामान्यं सुरक्षितं विधातुं सर्वैः सहभूय यत्नः करणीयः इति निष्कर्षः निष्कासितः।

# कुशः न केवलं पितृकर्मणः साधनम्, अपि तु यज्ञ-साधना- संस्कार- चिकित्सापरम्परायाः जीवन्तमङ्गम्



- डॉ. राघवनाथ झा, पटना

सनातनवैदिकपरम्परायां भाद्रपदमासस्य दर्शतिथौ (अमावास्यायाम्) आचर्यमाणा कुशोत्पाटिनी अमावस्या प्रकृति-संरक्षणस्य, यज्ञसंस्कृतेः, साधनायाश्च पावनं स्मरणपर्व वर्तते। अस्मिन् पुनीते दिने शास्त्रोक्तविधिना कुशस्य उत्पाटनं कृत्वा तस्य वर्षपर्यन्तं सकलसंस्कारेषु, देवार्चने, पितृकर्मणि च उपयोगः विधीयते। अत एव कुशोत्पाटिनी अमावस्या केवलं तृणसंग्रहस्य दिवसः न, अपितु वैदिकसंस्कृतेः प्रकृत्या सह तादात्म्यस्थापनस्य विशिष्टा तिथिः अस्ति।

भारतीयसंस्कृतिचिन्तने कुशः परमपवित्रः, यज्ञाङ्गभूतः तृणविशेषः स्वीकृतः। शास्त्रेषु कुशस्य त्रिगुणात्मकं स्वरूपं प्रतिपादयता उक्तम्-

"कुशमूले भवेद् ब्रह्मा कुशमध्ये तु केशवः।
कुशाग्रे शंकरं विद्धि कुश एते प्रतिष्ठिताः॥"

अनेन स्पष्टीभवति यत् कुशस्य मूलभागे सृष्टिकर्ता ब्रह्मा, मध्यभागे पालनकर्ता विष्णुः, अग्रभागे च संहारकर्ता देवाधिदेवः महादेवः समाविष्टाः सन्ति। श्राद्धकर्मतः परं सर्वसंस्कारेषु कुशस्य अनिवार्यता समाजे कश्चन भ्रमः दृश्यते यत् कुशस्य उपयोगः केवलं पितृकार्येषु अथवा श्राद्धे एव भवति। वस्तुतः तु वैदिकसंस्कारपरम्परायां कुशस्य व्याप्तिः अतिविशाला वर्तते। गर्भाधानादारभ्य अन्त्येष्टिं यावत्, पुंसां सङ्कल्पे, यज्ञकर्मणि, नवग्रहमखे, वास्तुशान्तौ, देवप्रतिष्ठायां, विवाहे, कन्यादाने च कुशस्य उपयोगादृते एकापि क्रिया पूर्णा न मन्यते। कुशं विना आचरितं देवकार्यं पितृकार्यं वा निष्फलं भवतीति कर्मकाण्डग्रन्थानां स्पष्टः निर्देशः।

### योगसाधनायां, बौद्धपरम्परायां च कुशपीठम्

कुशस्य महत्त्वं केवलं पूजाविधानपर्यन्तं सीमितं नास्ति, अपि तु चित्तैकाग्रतायै, योगसाधनायै चापि इदं सर्वोत्तमम् आसनं मन्यते। श्रीमद्भगवद्गीतायाः षष्ठेऽध्याये ध्यानयोगं वर्णयता योगेश्वरेण कृष्णेन स्पष्टमुक्तम्-

"शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्॥"

गोस्वामी तुलसीदासैरपि रामचरितमानसे समुद्रतीरे श्रीरामस्य साधनाप्रसङ्गे लिखितम्- "प्रथम प्रनाम कीन्ह सिरु नाई। बैठे पुनि तट दर्भ डसाई॥" बौद्धपरम्परायामपि बोधिसत्त्वः सिद्धार्थः 'सोत्थिय' (स्वस्तिक) नामकात् तृणहारकात् कुशतृणं गृहीत्वा बोधिवृक्षतले आस्तीर्य एव बुद्धत्वं प्राप्तवान्। एतेन कुशस्य वैश्विक- आध्यात्मिक-प्रभाविता सिद्ध्यति।

### आयुर्वेदीयदृष्टिः भाषिक-संस्कारश्च

आयुर्वेदस्य सुश्रुतसंहितायां 'तृणपञ्चमूल'गणे (कुश- काश- दर्भ- शर- इक्षु) कुशस्य औषधीयमहत्त्वं वर्णितम् अस्ति। पारम्परिक-चिकित्सायां कुशमूलं शीतवीर्यं, पित्तशामकं, दाहनाशकं, मूत्रकृच्छ्रनिवारकं च मन्यते।

अपरञ्च, कुशस्य तीक्ष्णतायाः सूक्ष्मतायाश्च कारणेन एव दक्षः जनः 'कुशलः' (कुशान् लाति गृह्णाति इति) तथा तीक्ष्णमतिः 'कुशाग्रबुद्धिः' इति भाषिकप्रयोगेण अलङ्कृतः।



हिमसंस्कृतवार्ताः, ईदरधीरजः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि! एकेन धननिवेशकेन त्रीणि दिनानि यावत् चलदूरभाषे लघु-दृश्यानां त्यागः कृतः। तेन कथितम्- एषा विरतिः मया महते प्रबोधाय अनुभूता इति।

**नन्दिनी-** सत्यम्, एषा समस्या सर्वैः अनुभूता, अतः एषः त्यागः प्रशंसनीयः जातः। अपरं वृत्तं शृणु- भारते सुरेन्द्रनाम्ना एकेन छात्रेण मासान् यावत् एकाकिना नदी शुद्धा कृता। तस्य दृश्यानि दृष्ट्वा प्रसिद्धया विदेश-संस्थया तस्मै कार्य-प्रस्तावः दत्तः!

**काव्या-** अहो! एकाकिनः जनस्य निश्चयेन महत् कार्यं सिद्धम्, तस्य श्रमः फलितः जातः। किन्तु कूटनीति-क्षेत्रे अपि किञ्चित् विचित्रं वृत्तं जातम्। अमेरिकादेशस्य पूर्व-अध्यक्षेण एकं मानचित्रं प्रसारितं, यत्र ऐस्लैण्डदेशः अपि अमेरिकादेशस्य भागत्वेन दर्शितः। अनेन क्रुद्धया ऐस्लैण्डमन्त्रिण्या अमेरिकीराजदूतः आहूतः, विरोधः च प्रकटितः!

**नन्दिनी-** हास्यकरम् एतत्, मानचित्र-प्रदर्शनेन अकारणम् एव कलहः उत्पादितः। अन्यदपि हास्यकरं वृत्तम् अस्ति तुर्की-देशस्य एकेन राजनेत्रा भाषणात्पूर्वं सप्तचत्वारिंशत् क्षणान् यावत् तूष्णीं स्थित्वा केवलं ध्वनिग्राहकाः सज्जीकृताः! जनैः तस्य एषा विचित्रचेष्टा सोल्लासं दृष्टा।

**काव्या-** सत्यं, भाषणापेक्षया ध्वनिग्राहक-सज्जीकरणम् एव जनेभ्यः अधिकं रुचितम्! एवंविधाभिः विचित्रवार्ताभिः एव संसारः मनोरञ्जकः दृष्टः। अद्यतनं वृत्तम् अत्रैव समाप्तम्।



## "संस्कृतकथामञ्जरी" {१६}

।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

"यज्ञलब्धफलदानं नाम दशमोपाख्यानम्" (१)

पुनरन्या पुत्तलिका तदेव सिंहासनं समारोढुकामं भोजं कथयति- श्रूयतां राजन्! विक्रमार्के राज्यं कुर्वति, कश्चित् योगी उज्जयिनीं प्रति आगतः। स च वेदशास्त्र- वैद्यक- ज्योतिष- भरतशास्त्रादि-सकलकलाविचक्षणः किं बहुना, तत् सदृशोऽन्यो नास्ति। स साक्षात् सर्वज्ञ एव। एकदा विक्रमो राजा तस्य प्रसिद्धिं श्रुत्वा, तमाह्वातुं पुरोहितं प्रेषितवान्। पुरोहितोऽपि तदन्तिकं गत्वा नमस्कृत्याऽब्रवीत्- भो स्वामिन्! राजा भवन्तमाह्वयति, तत्रागन्तव्यम्। योगिनोक्तं- तर्हि गम्यते। ततः तत्र गत्वा राजानं प्रति भणितं- भो राजन्! त्वं चेत् मन्त्रसाधनं करिष्यसि, तर्हि तेन जरामरणरहितो भविष्यसि। राज्ञोक्तं त्वं मन्त्रं ममोपदिश, अहं मन्त्रं साधयिष्यामि। ततो योगिना तस्मै मन्त्रमुपदिश्य भणितं- भो राजन्! अमुं मन्त्रं ब्रह्मचर्य्येण वर्षमेकं पठित्वा दूर्वाङ्कुरैर्दशांशहवनम् अग्नौ करिष्यसि, ततः पूर्णाहुतिसमये होमकुण्डात् कश्चित् पुरुषः फलहस्तो निर्गत्य फलमेकं तुभ्यं दास्यति। तत्फलभक्षणेन त्वं जरामरणरहितो वज्रकायश्च भविष्यसि इति राज्ञे मन्त्रमुपदिश्य स योगी निजस्थानं गतः।





# सम्राट् अशोकः

सम्राट् अशोकस्य जयन्ती अस्माकं देशे किमर्थं न आचर्यते? बहुधा चिन्तयित्वापि अस्य प्रश्नस्य उत्तरं न प्राप्यते! भवन्तोऽपि एतेषां प्रश्नानां विषये चिन्तयन्तु। पितुः नाम- बिन्दुसारगुप्तः।
मातुः नाम- सुभद्राणी। यस्य नाम्ना सह विश्वस्य इतिहासकाराः "महान्" इति विशेषणं प्रयुञ्जते, सः आसीत् महान् सम्राट् अशोकः।
यस्य राजचिह्नम् "अशोकचक्रम्" भारतीयैः स्वदेशस्य ध्वजे प्रतिष्ठापितम्। यस्य राजचिह्नं चतुर्मुखसिंहस्तम्भः भारतसर्वकारेण राष्ट्रचिह्नत्वेन स्वीकृतम्। तस्य अधः स्थितं "सत्यमेव जयते" इति वाक्यमपि राष्ट्रवाक्यत्वेन स्वीकृतम्।

**यस्य नाम्ना भारतस्य सैन्यस्य सर्वोच्चः युद्धसम्मानः "अशोकचक्रम्" इति प्रसिद्धः अस्ति।**

अखण्डभारतस्य- अद्यतननेपाल- भारत- ब्रह्मदेश- बाङ्गलादेश- जावा- सुमात्रा- पाकिस्तान- अफगानिस्तानादीनां विस्तीर्ण- भूभागस्य विशालसाम्राज्ये एकच्छत्राधिपत्यं कृतवान् सः सम्राट् आसीत्। तस्य पूर्वं वा पश्चाद् वा तादृशः अन्यः राजा अथवा सम्राट् नाभवत् इति कथ्यते। सम्राट् अशोकस्य शासनकाले त्रयोविंशतिः विश्वविद्यालयाः स्थापिताः इति प्रसिद्धिः। तेषु तक्षशिला, नालन्दा, विक्रमशिला, कन्दहार इत्यादयः प्रमुखाः आसन्। एतेषु विद्यापीठेषु चीनदेशात्, मङ्गोलियादेशात्, जापानदेशात् च छात्राः उच्चशिक्षाप्राप्तये भारतदेशम् आगच्छन्ति स्म। सम्राट् अशोकस्य शासनकालः विश्वस्य चिन्तकैः इतिहासकारैश्च भारतीयेतिहासस्य अत्यन्तं गौरवमयः सुवर्णकालः इति मन्यते। तस्य शासनकाले भारतदेशः "विश्वगुरुः" आसीत्। भारतं समृद्धिसम्पन्नं राष्ट्रम् आसीत्। प्रजाः सुखिनः आसन्, समाजे भेदभावश्च न्यूनः आसीत् इति वर्ण्यते। यस्य शासनकाले महामार्गाः निर्मिताः। प्रसिद्धस्य "ग्रेट ट्रङ्क रोड" इत्यस्य सदृशाः अनेकाः मार्गाः निर्मिताः। प्रायः द्विसहस्रकिलोमीटर-दीर्घस्य मार्गस्य उभयतः वृक्षाः रोपिताः, यात्रिकाणां विश्रान्त्यर्थं पान्थशालाः निर्मिताः च। मानवाः केवलं मानवाः इति न, अपि तु पशूनामपि चिकित्सायै चिकित्सालयाः स्थापिताः इति कथ्यते। पशूनां हिंसाया अपि निरोधः कृतः। एवं विधस्य महतः सम्राट् अशोकस्य जयन्ती तस्यैव देशे किमर्थं न आचर्यते? तस्य जयन्त्याः अवसरे सार्वजनिकावकाशः अपि किमर्थं न घोषितः? येषां नागरिकाणां एतां जयन्तीं श्रद्धया आचरितुं योग्यं, ते स्वकीयम् इतिहासं विस्मृतवन्तः। ये तु इतिहासं जानन्ति, ते अपि एतां जयन्तीं किमर्थं न आचरितुमिच्छन्ति इति चिन्तनीयं, खेदजनकं च।

## चन्द्रगुप्तः वा सिकन्दरः?

"यः विजयी सः चन्द्रगुप्तः" इति गौरवपूर्णा भावना अस्माभिः धारणीया आसीत्। किन्तु "यः विजयी सः सिकन्दरः" इति कथनं कथं प्रसिद्धम् अभवत्? चन्द्रगुप्तमौर्यस्य प्रभावं पराक्रमं च दृष्ट्वैव अलेक्जाण्डरस्य (सिकन्दरस्य) सैन्येन युद्धं कर्तुं न स्वीकृतम् इति प्रसिद्धिः अस्ति। तस्य सैन्यस्य मनोबलं भग्नम् अभवत्, अतः अलेक्जाण्डरेण पश्चिमदिशि प्रत्यावर्तनं कर्तव्यम् अभवत्। यः सिकन्दरः "जगत्जेता" इति कथ्यते, तस्य प्रत्यावर्तनस्य कारणभूतः भारतीयः वीरः तु इतिहासवर्णने बहुधा विस्मृतः भवति। अतः अस्माभिः स्वकीयः इतिहासः ज्ञातव्यः, स्वकीयाः वीराः स्मर्तव्याः, तेषां गौरवगाथा च भाविपीढीभ्यः कथनीया। स्वकीय-इतिहासस्य विस्मरणं राष्ट्रस्य दुर्भाग्यम्; स्वकीयवीराणां स्मरणं तु राष्ट्रगौरवस्य लक्षणम्।


सुधा साठे,मुम्बई

**संकलितम् अनुवादितं च**
**सुधा साठे, मुंबई**

# विनोबा- भावे- विश्वविद्यालयस्य संस्कृतविभागस्य पञ्चदिवसीयव्याख्यानमालाया द्वितीयदिनं सम्पन्नम्







**हिमसंस्कृतवार्ताः- प्रज्ञा द्विवेदी, झारखण्डः।** षड्विंशत्यधिकद्विसहस्रतमकृष्टाब्दसितम्बरमासनव दिनाङ्के पञ्चदिवसीयव्याख्यानमालाया द्वितीय-दिनस्य व्याख्यानं तुलसीदाससभागारे सम्पन्नमभवत्। कार्यक्रमस्य शुभारम्भः दीप-प्रज्वलनेन भगवत्यै सरस्वत्यै पुष्पाञ्जलिसमर्पणेन च अभवत् तथा च सर्वैः मिलित्वा सरस्वतीवन्दनया तस्याः स्तुतिः कृता। तदनन्तरं पूर्वाह्ने सार्धदशवादनतः द्वादशवादनपर्यन्तं व्याख्यानस्य प्रथमसत्रं प्राचलत् यस्य विषयः भारतीयसंस्कृत्याधारितदिनचर्या आसीत्। व्याख्यानस्य मुख्यवक्ता डॉ. घनश्यामचन्द्रोपाध्याय स्वव्याख्याने दिनचर्याया विषये वर्णयन् ब्राह्ममुहूर्ते जागरणस्य लाभान् अज्ञापयत्। स उक्तवान् यत् सूर्योदयात् षड्घटीपूर्वं अर्थात् चतुर्विंशतिनिमेषाधिकद्विहोरापूर्वमेव ब्राह्ममुहूर्तस्य प्रारम्भसमयः भवति तथा च तस्मिन्नेव समये पृथिव्यां सूर्यस्य प्रथमा किरणः पतितुम् आरभते। तेनोक्तं यत् गम्भीराध्ययनाय मानसिकैकाग्रता अतीवावश्यकी वर्तते। अत्र प्रसङ्गे व्यर्थविचारान् नियन्त्रितुं तेन उपायाः अपि प्रदर्शिताः।प्रथमव्याख्याने एव स विद्यार्थिनां समस्यासु प्रकाशमक्षिपत्। जङ्गमदूरवाणीव्यसनम् एकाग्रताया अभावः, परीक्षायाः प्रतिबलम्, आत्मविश्वासहीनता, लक्ष्यस्यास्पष्टता, संवादकौशलं, प्रत्यवधानहीनता, पुस्तकापठनञ्चेत्येताः सर्वाः वर्तमाने समस्याः सन्तीति तेन प्रतिपादितम्। स तासां दूरीकरणस्योपायान् अपि असूचयत्। तेनोक्तं यत् छात्राः पुस्तकानि पठेयुः मानसिकैकाग्रतां रक्षेयुः तथा च न्यूनसंसाधनेष्वपि निरन्तरं परिश्रमं कुर्युः। तदनन्तरं सपादद्वादशवादने द्वितीयं व्याख्यानम् आरब्धं यस्य विषयः श्रीमद्भागवतस्य स्वरूपगताध्ययनम् आसीत्। अस्मिन् स उक्तवान् यत् अद्यापि श्रीमद्भागवते पञ्चाशदधिक-त्रिशताधिकत्रिसहस्रं श्लोकाः न्यूनाः सन्ति। एतद्विषये तेन अनेकानि प्रमाणानि प्रदत्तानि तथा च तस्यानुसन्धानाय विद्यार्थिनः प्रेरिताः। श्रीमद्भागवतम् अन्तिममष्टादशपुराणं मन्तव्यम् इति विषयस्य कारणेष्वपि तेन प्रकाशः निक्षिप्तः। तदनन्तरं डॉ. अखिलेश्वरपाठकः धन्यवादज्ञापनं कृत्वा इमं कार्यक्रमं समापितवान्।
अवधेयं यत् अस्मिन् कार्यक्रमे संस्कृतविभागस्य प्राध्यापकः डॉ नकुलपांडेयः, विभागाध्यक्षा डॉ. अञ्जुमारा, डॉ अखिलेश्वरपाठकः सिंहपुरुषोत्तमकुमारः डॉ. तिवारिसुधीरः इत्यादयः सर्वमहाविद्यालयानां विद्यार्थिनश्च उपस्थिताः आसन्

